Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३९
मार्च - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

चरणैः किं प्रयोजनम् ?



कश्चित् हरिणः वने सुखेन वसति । अथ कदाचित् तडागे स्वीयं प्रतिबिम्बं पश्यन् सः चिन्तयति । 'मम सर्वाणि गात्राणि मनोहराणि । शरीरस्य आकारः, तत्र प्रकाशमानानि स्वर्णमयानि रोमाणि, कवीनां प्रियं नेत्रयुगलम्, मस्तके विराजमानं शृङ्गद्वयं च गौरववर्धनाय अलम् । अहो ! ईश्वरस्य औदार्यम् !' पुनः सः अधः पादान् अवलोकयन् चिन्तयति । 'परन्तु एते कुरूपाः पादाः शरीरस्य शोभां नाशयन्ति । ईश्वरः पादान् किमर्थं दत्तवान् ? ह्रस्वाः पादाः अपि पर्याप्ताः । बहूनां जन्तूनां पादाः ह्रस्वाः भवन्ति एव । अहं तु लज्जाम् अनुभवामि ।'

एवं चिन्तयति हरिणे, केचन व्याधाः समागताः । तदा विषमेषु मार्गेषु वेगेन धावन् सः कथञ्चित् रक्षितः । हरिणः पुनः चिन्तयति यत् प्राणसङ्कटे एते कुरूपाः पादाः एव साहाय्यं कृतवन्तः ।

शृङ्गादीनि अङ्गानि हरिणस्य सौन्दर्यं वर्धयन्ति इति सत्यम्, परन्तु तत्र कुरूपान् पादान् सः उपेक्षितुं नार्हति । तथैव मनुष्यजीवने बौद्धिकैः व्यापारैः सह कुरूपाः दृश्यमानाः शारीराः व्यापाराः अपि आवश्यकाः एव । पाणिपादस्य उपयोगेन मनुष्यस्य प्रतिष्ठा अपचीयते इति भ्रान्तिः लोके प्रसृता । न तावत्, पाणिपादस्य उपयोगेन बुद्धिः अपि मन्दा भवति इत्यपि श्रूयते । बुद्धिप्रधानाः जनाः मन्यन्ते यत् अस्माभिः शारीरी प्रवृत्तिः न कर्तव्या । शारीरी प्रवृत्तिः अधमा । एवं मन्यमानाः ते भोजनं किमर्थं कुर्वन्ति ? भोजनकर्म अपि शारीरम् एव ननु ! बुद्धिमन्तः काव्यरसपानेन तृप्ताः भवेयुः ।

वस्तुतः कौशलं प्राप्तव्यं चेत् बौद्धिकः शारीरश्च इति उभयविधः श्रमः आवश्यकः । शारीरे श्रमे बुद्धेः मिश्रणं कर्तव्यम् । ततः कृतं कार्यं प्रमाणशुद्धम् अल्पश्रमसाध्यं च भवति । किमपि कार्यम् अनुभवेन विना पङ्गु भवति । शारीरः श्रमः अनुभवं कारयति । बुद्धिमान् मनुष्यः गृहस्य आकृतिं लेखितुं शक्नोति । परन्तु गृहनिर्माणेन विना तस्य अनुभवं लब्धुं न शक्नोति । आकृतिः केवलं शास्त्रम् अस्ति । शास्त्रम् अनुभवेन विना नितराम् अपूर्णं भवति ।

पुण्यं कर्म

पुरा धर्मपालनामकः वणिक् अक्षयपुरनिवासी आसीत्। तस्य वणिजः पत्नी सुलक्षणा इति। तयोः दम्पत्योः पञ्च पुत्राः आसन्। सः वणिक् वाणिज्यं कुर्वन् प्रभूतं धनं सम्पादितवान् । तौ दम्पती प्रतिदिनं तुलस्याः, अश्वत्थवृक्षस्य, आमलकवृक्षस्य च पूजां कुरुतः स्म।

तयोः दम्पत्योः कश्चन विशिष्टः नियमः आसीत्। प्रतिदिनमपि तौ कस्मैचित् निर्धनाय जनाय एकं सुवर्णामलकं दत्त्वा एव भोजनं कुरुतः स्म।

गच्छति काले ज्येष्ठस्य पुत्रस्य विवाहः अभवत्। पतिगृहम् आगता ज्येष्ठा स्नुषा श्वश्र्वा क्रियमाणं सुवर्णामलकस्य दानं न असहत।

अतः श्वश्रूम् उक्तवती सा – "अम्ब। प्रतिदिनम् एवं सुवर्णामलकदानं क्रियते चेत् गृहस्य परिस्थितिः शोचनीया भवेत्। अतः भवत्या रजतस्य आमलकं दीयते चेत् वरम्" इति।

तस्याः वचनं तौ वृद्धदम्पती अङ्गीकृत्य ततः आरभ्य रजतामलकस्य दानम् आरब्धवन्तौ।

यदा द्वितीयपुत्रस्य विवाहः सम्पन्नः तदा द्वितीया स्नुषा रजतामलकस्य दानं न असहत। सा श्वश्रूम् उक्तवती – "एतावत् रजतं दानरूपेण गच्छति चेत् न ज्ञायते, अग्रे गृहस्य परिस्थितिः कीदृशी भवेत् इति। अतः ताम्रस्य आमलकस्य दानं क्रियते चेत् उचितं भवेत्" इति।

इदानीं तौ दम्पती स्ववार्धक्यानुगुणं मनसि स्थितां भावनां दूरीकुर्वन्तौ तस्याः स्नुषायाः कथनानुसारं ताम्रामलकस्य दानम् आरब्धवन्तौ।

एवमेव तृतीयस्य पुत्रस्य अपि विवाहः जातः। तस्य पत्नी अपि पतिगृहम् आगता। सा ताम्रामलकस्यापि दानं न असहत।

सापि श्वश्रूम् उक्तवती – "अम्ब ! गृहस्य परिस्थितिं पश्यामः चेत् भासते यत् दानरूपेण अधिकमूल्ययुक्तस्य ताम्रस्य दानं न उचितम् इति। अतः इतः परं लोहस्य आमलकस्य दानं क्रियते चेत् समीचीनं भवेत्" इति।

तौ वणिग्दम्पती अनेन असन्तुष्टौ। तथापि विना वचनम् अयसः आमलकस्य दानमेव आरब्धवन्तौ।

किन्तु एतावता तस्य गृहस्य परिस्थितिः असमीचीना जाता आसीत्। सर्वेषु पुत्रेषु महत् आलस्यं प्रवृद्धम्

आसीत्। काऽपि स्नुषा कार्यं कर्तुं न इच्छति स्म। गच्छता कालेन तस्मिन् गृहे महतः दारिद्र्यस्य सर्वाणि लक्षणानि आगतानि एव।

चतुर्थस्य पुत्रस्यापि विवाहः जातः। चतुर्थी स्नुषाऽपि गृहम् आगता। सा श्वश्रूम् उक्तवती – "अम्ब! भवद्भ्यां यत् अयसः दानं क्रियमाणम् अस्ति तेनैव यदि वाणिज्यम् आरभ्येत तर्हि गृहपरिस्थितिः किञ्चित् उत्तमा भवेत्। दानं कृत्वा परलोके सुखम् इच्छन्तौ भवन्तौ अस्मिन् लोके जीवतां पुत्रपौत्राणां स्थितिं कष्टमयीं कुरुतः। दानं करणीयमेव इति मनसि अस्ति चेत् पिष्टस्य आमलकं कृत्वा दीयताम्" इति।

तस्याः स्नुषायाः वचनं तौ वृद्धदम्पती अङ्गीकृतवन्तौ। किन्तु यदा पञ्चमस्य पुत्रस्य पत्नी आगत्य पिष्टामलकदानमपि स्थगितवती तदा नितरां दुःखितौ तौ दम्पती तीर्थक्षेत्रदर्शनव्याजेन गृहात् प्रस्थितौ।

एतावति काले पञ्चसु अपि पुत्रेषु आलस्यं प्रवृद्धम् आसीत्। ते उद्योगं तु न कुर्वन्ति स्म। विद्याभ्यासः अपि तैः पूर्वं न कृतः आसीत्। विना कार्यं गृहे उपविश्य भोजनादिकं कृतवतां तेषां कार्ये मनः न प्रवृत्तमेव। श्रमं विना यः अन्नं भुङ्क्ते तं चोरं वदन्ति ज्येष्ठाः। अतः संस्काररहितानां तेषां प्रवृत्तिः गृहे दारिद्र्यस्य दुराचारस्य च कारणं जाता।

गृहतः प्रस्थितौ तौ वृद्धदम्पती सरयूनद्याः तटे स्थिते वने वसन्तौ, आमलकैः आयुर्वेदीयौषधं निर्माय तस्य विक्रयणेन जीवने पुनः तृप्तिं सम्पादितवन्तौ।

श्रमेण कृतेन कर्मणा ताभ्याम् अविलम्बेन फलं प्राप्तम्। तौ एकं विशालं मन्दिरं भवनं च निर्मापयितुम् उद्युक्तौ। नगरे स्थितानां तयोः पुत्राणां स्नुषाणां च परिस्थितिः अतीव शोचनीया संवृत्ता। दरिद्राः ते इदानीं महता श्रमेण कार्यं कुर्वन्तः उदरं पूरयितुं प्रयतन्ते स्म। यदा सरयूनद्याः तटे प्रियाङ्कानामिकायां नगर्यां विशालं मन्दिरं निर्मीयमाणम् आसीत् तदा कर्मकरत्वेन तत्र कार्यं कर्तुम् एते पञ्च पुत्राः अपि पत्नीभिः सह आगताः।

एकस्मिन् दिने सुलक्षणायाः सेविकाः रजतमयम् आमलकं कनिष्ठस्नुषायै दानरूपेण दत्तवत्यः। तत् आमलकं हस्ते संस्थाप्य रुदती सा उक्तवती – "मम श्वश्रूः अपि एवमेव दानं करोति स्म। अस्माकं सर्वेषां दुष्कर्मणः कारणतः मम श्वश्रूश्वशुरौ अस्मान् परित्यज्य गतौ। इदानीं तौ कुत्र स्तः इति न ज्ञायते" इति।

एतत् वचनं ताः सेविकाः सुलक्षणाम् उक्तवत्यः। सुलक्षणया सर्वं ज्ञातम् अभवत्। सा ताः पञ्च स्त्रीः, तासां पतीन् च स्वभवनम् आनायितवती। पुत्राणां केशकर्तनादिकं सर्वं कारयित्वा वस्त्रादिभिः अलङ्कारितवती। स्नुषाः अपि आहूय तासां केशप्रसाधनादिकं कारयित्वा उत्तमैः वस्त्राभरणैः अलङ्कारं कारितवती।

ततः तौ वृद्धदम्पती स्वपरिवारेण सह मिलितवन्तौ। एतदनन्तरं सर्वैरपि 'शुभानि कर्माणि सर्वदा उत्तमफलं ददति' इति ज्ञातम्। तदारभ्य सर्वे अवगुणान् संत्यज्य योग्येन क्रमेण त्यागादिकं कुर्वन्तः सुखेन जीवनं कृतवन्तः।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते...)

कविकुलगुरुविरचितेषु प्रबन्धेषु एकतमा कृतिः अभिज्ञानशाकुन्तलाभिख्यं नाटकम् । तत्रैतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः । तदनुरोधेन पुण्याश्रमं गतस्य तस्य शकुन्तलायां स्नेहः समुत्पन्नः । कालेन तयोः परस्परम् अनुरागः गाढतरः अभवत् । इष्टिकाले आपद्द्वयनिवारणार्थं ऋषिभिः आहूतः दुष्यन्तः । तत्रैव तान् रक्षन् सः स्थितः । तत्र तयोः गान्धर्वविवाहः जातः ।

चतुर्थाङ्कस्य प्रवेशकेन ज्ञायते – ऋषीणां यज्ञः सम्पन्नः । ते दुष्यन्तं पुनः प्रेषितवन्तः । दुष्यन्तेन सह गान्धर्वेन विवाहेन शकुन्तला नितरां निवृता । अनसूया चिन्ताग्रस्ता यत् कुलपतेः कण्वस्य आगमने वृत्तान्तस्य च ज्ञाने किं भविष्यतीति । तदैव ताभ्यां श्रूयते –

'विचन्तयन्ती यमनन्यमानसा तपोनिधिं वेत्सि न मामुपस्थितम् । स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव ।' इदं दुर्वाससा ऋषिणा शप्तम् । सख्यौ तत्र गत्वा ऋषिं प्रणमतः । तयोः निवेदनेन शापनिवृत्तेः उपायः दर्शितः – ''अभिज्ञानाभरणदर्शनादस्याः शापो निवर्तिष्यते'' इति । सखीं कथमपि रक्षितुं कृतप्रतिज्ञे ते यथास्थानं गच्छतः । प्रातःकालः संवृत्तः । प्रियंवदा अनसूयां सूचयति यत् प्रातःकाले यज्ञकाले छन्दोवत्या वाचा तातकण्वेन सर्वोऽपि वृत्तान्तः ज्ञातः –

''दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥''

ते मुदिते । शार्ङ्गरव–शारद्वतौ वत्सां शकुन्तलां सज्जीकर्तुम् आदिष्टौ । सखीभ्यां अनसूयाप्रियंवदाभ्यां शकुन्तलायाः समालभनम् आरब्धम् । तदैव हारीतेन कण्वशिष्येण आगत्य शकुन्तलायै आभरणानि प्रदत्तानि । ताभ्याम् आरब्धं तैः अलङ्कारैः सज्जीकरणम् । तदैव कण्वः प्रविश्य श्लोकेन इमेन स्वीयं शोकं प्रकटयति ।

यास्यत्यद्य शकुन्तलेति हृदयं स्पृष्टं समुत्कण्ठया अन्तर्बाष्पभरोपरोधि गदितं चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

तातः प्रविष्टः इति गौतमी शकुन्तलायै सूचयति । सव्रीडं प्रणतायै शकुन्तलायै कण्वः एतैः वचनैः आशिर्वचनं ददाति –

''ययातिरिव शर्मिष्ठाः पत्युर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥''

शकुन्तला अग्नेः प्रदक्षिणां करोति । शार्ङ्गरवः पन्थानम् आदेशयति । कण्वेन तपोवनतरवः संबोध्यन्ते –

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

शकुन्तलायाः वियोगेन तपोवनस्याऽपि अवस्था दर्शनीया अभवत् । निर्गमकाले सा माधवीलताम् आलिङ्गति ।

(क्रमशः...)

मासवार्त्ताः

आरब्धौ संस्कृतभाषाशिक्षणवर्गौ

संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य अनेकान् वर्गान् नियतम् आयोजयति । एतस्मिन् उपक्रमे फरवरीमासस्य ९ दिनाङ्कतः संस्कृतशिक्षणस्य प्रथमस्तरस्य द्वितीयस्तरस्य च आरम्भः जातः वर्तते । संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य समयः सायं ६:३० तः ८ वर्तते । संस्कृतभाषाशिक्षणस्य द्वितीयस्तरस्य समयः प्रातः ७ तः ८:३० वर्तते । अत्र उल्लेखनीयं यत् एकलव्य-संस्कृत-एकेडेमीसंस्थानेन छात्रा: online एवं च offline मिलित्वा पठितुं शक्नुयुः तथा व्यवस्था कृता वर्तते । उभयोः वर्गयोः आहत्य २५ छात्राः प्रवेशं स्वीकृतवन्तः । एतौ वर्गौ एप्रिलमासपर्यन्तं प्रचलष्यितः ।

आरब्धं श्रीमद्भगवद्गीताकेन्द्रम्

श्रीमद्भगवद्गीतायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्थानस्य गान्धिनगरकेन्द्रे श्रीमद्भगवद्गीताकेन्द्रम् आरब्धं वर्तते । वर्गेऽस्मिन् श्रीमद्भगवद्गीतायाः श्लोकानां शुद्धोच्चारणपूर्वकं गानं, सरलार्थश्च पाठयिष्यते । श्रीमती ओजसी सुखटणकरः छात्रेभ्यः मार्गदर्शनं प्रदास्यति ।

शिवानन्दाश्रमे आरब्धः संस्कृतवर्गः

एकलव्य-संस्कृत-एकेडेमी, शिवानन्दाश्रमः अमदावादम्, इत्यनयोः संयुक्तोपक्रमेण शिवानन्दाश्रमे संस्कृतवर्गः आरब्धः वर्तते । वर्गेऽस्मिन् आश्रमस्य साधकाः संस्कृतभाषां पठिष्यन्ति । अयं साप्ताहिकवर्गः प्रति शनिवासरे ६:०० तः ७:३० पर्यन्तं प्रचलिष्यति । सु.श्री दिशा परमारः वर्गेऽस्मिन् छात्रेभ्यः मार्गदर्शनं प्रदास्यति ।

कृपया हसन्तु

शिक्षक: - (रमणम् उद्दिश्य) भो: रमण ! किमर्थं विलम्बेन आगतवान् ?

रमण: - हे गुरो ! किं करवाणि ? मदपेक्षया समयस्य गति: अधिका अस्ति । अहं तं पराजेतुम् असमर्थ: अत: विलम्ब: ।

★ ★ ★ ★ ★

माता - भो: पुत्र ! बहि: मा गच्छ, अतिताप: वर्तते ।

पुत्र: - अम्ब ! अहं केवलं ज्ञातुम् इच्छामि सूर्य: कदा विश्रामं करोति ?

★ ★ ★ ★ ★

शिक्षक: - (नमनम् उद्दिश्य) ग्रीष्मे किं श्रेष्ठम् ?

नमन: - शीतलजलम् ।

शिक्षक: - अन्यत् ?

नमन: - अवकाश:

★ ★ ★ ★ ★

आपणिक: - (एकां महिलाम् उद्दिश्य) भो: भगिनि ! भवती सदैव आपणम् आगत्य केवलं आभूषणानि पश्यति । किमपि गृहीत्वा न गच्छति ।

महिला - तथा नास्ति महोदय, यदा अहम् अत्र आगच्छामि तदा किमपि गृहीत्वा तु गच्छामि एव, किन्तु भवान् एव ध्यानं न ददाति ।

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

स एव धन्यो विपदि स्वरूपं न मुञ्चति ।
त्यजत्यर्ककरैस्तप्तं हिमं देहं न शीतताम् ।

तात्पर्यम् – आपत्काले य: स्वाभाविकं गुणं न त्यजति स: एव धन्य: । यथा हिमं सूर्यकिरणै: तप्तमपि केवलं देहं त्यजति, न तु शीततां त्यजति। स्वाभाविकं गुणं शीतत्वं न त्यजति।

संहति: श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुला: ॥

तात्पर्यम् – मानवेषु ऐक्यम् अत्यावश्यकम्। प्राणिन: क्षुद्रा: चेदपि सङ्घटनस्य कारणत: बलं प्राप्नुवन्ति। तुष: निरुपयोगी इति निष्कासित: चेत् तण्डुला: न वर्धन्ते एव।

सतां हि दर्शनं पुण्यं तीर्थभूताश्च सज्जना: ।
कालेन फलते तीर्थम् सद्य: सज्जनसङ्गति: ॥

तात्पर्यम् – साधुजनानां दर्शनं सुकृतिकरं भवति। सज्जना: पुण्यक्षेत्रसदृशा: भवन्ति। पुण्यक्षेत्रसन्दर्शनेन फलं चिरेण लभ्यते। साधुसमागमस्तु सपदि फलं ददाति।

ज्ञानसरित्

श्यामः पटेलः

अमेरिकादेशस्य क्रीडासक्ता रोमशी

रामकथासु एका प्रचलिता कथा अस्ति। यस्याम् एका रोमशी समुद्रतटे सेतुबन्धनावसरे भगवत्कार्ये सेवारता भवति तां दृष्ट्वा भगवान् श्रीरामः स्वहस्तकमलं रोमश्याः पृष्ठोपरि संस्थाप्य आशिषः ददाति। तदारभ्य भारते रोमशी सेवायाः प्रतीकरूपेण प्रसिद्धिं गता।

किन्तु अमेरिकायाः उत्तरस्थेषु पेसिफिक-समुद्रतटीयस्थानेषु क्रीडासक्ता रक्तवर्णीया रोमशी स्ववाचालत्वेन लोकप्रिया सञ्जाता अस्ति। एषा मनुष्येभ्यः न बिभेति। प्रत्युत मनुष्यान् मैत्रीभावेन भजति। अस्माकं सामान्यरोमश्याः अपेक्षया लघ्वी इयं १३ तः १५ सेन्टीमीटरमितं दीर्घं रोमगुच्छमयं पुच्छं विदधाति। तस्याः पृष्ठभागस्य वर्णः रक्तः तथा च वक्षःस्थानस्य वर्णः काषायः भवति। तस्याः शरीरे श्वेतवर्णीयाः रेखाः भवन्ति। तथा च नेत्रे परितः श्वेतवर्णीयः वलयो भवति। एतस्याः निवासः वृक्षस्य बिलमेव भवति। किन्तु भूमौ विवरं निर्माय भोजनस्य सङ्ग्रहं करोति। यद्यपि एषा फलानि खादति तथापि कदाचित् लघुपक्षिणाम् आखेटमपि करोति। यदा एषा भयभीता भवति तदा तु उच्चैः क्रन्दति। किन्तु अकारणमपि सदा कर्कशनादं कुर्वती अस्ति। अतः किञ्चित् कुख्यातापि वर्तते।

रोमशी– Squirrel

शब्दमञ्जूषा

अकरणिः	असफलता	Failure
व्रततिः	बेल	creeper
जन्तुमती	पृथ्वी	The earth
समीहित	अभिलषित	desired
बलिशम्	मछली पकड़ने का कांटा	fish-hook
विधन	निर्धन	Poor
जूतिः	चाल	Going on
उपनिर्गमः	मुख्य सड़क	royal road
स्रज्वा	रस्सी	rope
वमः	वमन करना	vomiting
विधूमः	निर्धूम	smokeless
जहानकः	महाप्रलय	annihilation
विमानितः	अपमानित	disrespected
प्रवाचनम्	घोषणा	proclamation
शक्राणी	इन्द्राणी	wife of Indra

किं भवन्तः जानन्ति ?

१) दुर्गापूजोत्सवः कस्मिन् राज्ये आधिक्येन आयोज्यते ?
(क) बिहारे (ख) मध्यप्रदेशे (ग) बङ्गाले (घ) उडीसायाम्

२) नवरात्रोत्सवे कतिदिनानां व्रतम् आचरन्ति जनाः ?
(क) सप्त (ख) नव (ग) एकादश (घ) द्वादश

३) वैशाखीपर्व कस्मिन् राज्ये प्रामुख्येन आचर्यते ?
(क) तमिलनाडौ (ख) कर्णाटके (ग) उडीसायाम् (घ) पञ्जाबे

४) स्त्रियः स्वस्तिकव्रतं कस्मिन् ऋतौ आचरन्ति ?
(क) ग्रीष्म-ऋतौ (ख) शरद्-ऋतौ (ग) वर्षा-ऋतौ (घ) शिशिर-ऋतौ

५) 'लोहड़ी' कस्य राज्यस्य प्रमुखः उत्सवः अस्ति ?
(क) असमस्य (ख) प.बङ्गालस्य (ग) कर्णाटकस्य (घ) पञ्जाबस्य

६) गणेशपूजा कस्य राज्यस्य प्रमुखः उत्सवः अस्ति ?
(क) प.बङ्गालस्य (ख) महाराष्ट्रस्य (ग) कर्णाटकस्य (घ) तमिलनाडोः

७) 'माघ बिहू' 'रङ्गाली बिहू' च कस्मिन् प्रान्ते प्रामुख्येन आचर्यते ?
(क) प.बङ्गाले (ख) गुजराते (ग) असमे (घ) राजस्थाने

उत्तराणि – (१) ग (२) ख (३) घ (४) ग (५) घ (६) ख (७) ग

अस्माकम् आगामिकार्यक्रमाः

“संस्कृतसाम्प्रतम्” मासिकस्य विषये पत्रक्रमाङ्कः ४ अनुगुणं विवरणम् ।

१. प्रकाशनस्थानम् - “एकलव्य-संस्कृत-एकेडेमी”
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

२. प्रकाशनकालः - मासिकः

३. मुद्रकः प्रकाशकः - डो. मिहिरः उपाध्यायः
राष्ट्रियता - भारतीयः

४. सम्पादकः - डो. मिहिरः उपाध्यायः
राष्ट्रियता - भारतीयः
सङ्केतः - “एकलव्य-संस्कृत-एकेडेमी”
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

५. सदस्यनाम - डो. मिहिरः उपाध्यायः , सम्पादकः
सङ्केतः - “एकलव्य-संस्कृत-एकेडेमी”
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

अहं डो. मिहिरः उपाध्यायः घोषयामि यत् उपर्युक्ताः अंशाः नियमानुसारं योग्याः सन्ति ।

दिनाङ्कः - 01/03/2026

Learn... SANSKRIT with fun ...

EKLAVYA SANSKRIT ACADEMY

Eklavya Sanskrit Academy present

SANSKRIT SUMMER CAMP

for children
(Class SKg to 8)

From 04/05/2026 to 14/05/2026
Daily 10 AM to 11.30 AM
Fees: ₹ 2500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

Learn Offline

संस्कृतव्याकरणम्

(Class 9 - 10)

Date : 04/05/2026 to 14/05/2026
Day : Daily (Sunday off)
Time : 08:00 am to 9:30 am
Fees : Rs. 4000/-
contact: Dr Mihir Upadhyay, 98246 16237

संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ‘‘साम्प्रतम्’’ मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

प्रियवाचकाः

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006